# मेघदूतम्

Exported from ambuda.org on 2025-12-24 07:11:50 UTC

1.head

पूर्वमेघः

1.1

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः शापेनास्तंगमितमहिमा वर्षभोग्येण भर्तुः ।यक्षश् चक्रे जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

1.2

तस्मिन्न् अद्रौ कतिचिद् अबलाविप्रयुक्तः स कामी नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ।आषाढस्य प्रथमदिवसे मेघम् आश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

1.3

तस्य स्थित्वा कथम् अपि पुरः कौतुकाधानहेतोर् अन्तर्बाष्पश् चिरम् अनुचरो राजराजस्य दध्यौ ।मेघालोके भवति सुखिनो ऽप्य् अन्यथावृत्ति चेतः कण्ठाश्लेषप्रणयिनि जने किं पुनर् दूरसंस्थे ॥ ३ ॥

1.4

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

1.5

धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।इत्य् औत्सुक्याद् अपरिगणयन् गुह्यकस् तं ययाचे कामार्ता हि प्रकृतिकृपणाश् चेतनाचेतएषु ॥ ५ ॥

1.6

जातं वंशे भुवनविदिते पुष्करावर्तकानां जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर् गतो ऽहं याच्ञा मोघा वरम् अधिगुणे नाधमे लब्धकामा ॥ ६ ॥

1.7

संतप्तानां त्वमसि शरणं तत् पयोद प्रियायाः संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।गन्तव्या ते वसतिर् अलका नाम यक्षेश्वराणां बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

1.8

त्वाम् आरूढं पवनपदवीम् उद्गृहीतालकान्ताः प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययाद् आश्वसन्त्यः ।कः संनद्धे विरहविधुरां त्वय्य् उपेक्षेत जायां न स्याद् अन्यो ऽप्य् अहम् इव जनो यः पराधीनवृत्तिः ॥ ८ ॥

1.9

त्वां चावश्यं दिवसगणनातत्पराम् एकपत्नीम् अव्यापन्नाम् अविहतगतिर् द्रक्ष्यसि भ्रातृजायाम् ।आशाबन्धः कुसुमसदृशं प्रायशो ह्य् अङ्गनानां सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ ९ ॥

1.10

मन्दं मन्दं नुदति पवनश् चानुकूलो यथा त्वां वामश् चायं नदति मधुरं चातकस् ते सगन्धः ।गर्भाधानक्षणपरिचयान् नूनम् आबद्धमालाः सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ १० ॥

1.11

कर्तुं यच् च प्रभवति महीम् उच्छिलीन्ध्राम् अवन्ध्यां तच् छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।आ कैलासाद् बिसकिसलयच्छेदपाथेयवन्तः संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

1.12

आपृच्छस्व प्रियसखम् अमुं तुङ्गम् आलिङ्ग्य शैलं वन्द्यैः पुंसां रघुपतिपदैर् अङ्कितं मेखलासु ।काले काले भवति भवतो यस्य संयोगम् एत्य स्नेहव्यक्तिश् चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥ १२ ॥

1.13

मर्गं तावच् छृणु कथयतस् त्वत्प्रयाणानुरूपं संदेशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।खिन्नः खिन्नः शिहरिषु पदं न्यस्य गन्तासि यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥ १३ ॥

1.14

अद्रेः शृङ्गं हरति पवनः किं स्विद् इत्य् उन्मुखीभिर् दृष्टोत्साहश् चकितचकितं मुग्धसिद्धाङ्गनाभिः ।स्थानाद् अस्मात् सरसनिचुलाद् उत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥ १४ ॥

1.15

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ताद् वल्मीकाग्रात् प्रभवति धनुःखण्डम् आखण्डलस्य ।येन श्यामं वपुर् अतितरां कान्तिम् आपत्स्यते ते बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥

1.16

त्वय्य् आयन्तं कृषिफलम् इति भ्रूविकारान् अभिज्ञैः प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।सद्यःसीरोत्कषणसुरभि क्षेत्रम् आरुह्य मालं किंचित् पश्चाद् व्रज लघुगतिर् भूय एवोत्तरेण ॥ १६ ॥

1.17

त्वाम् आसारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्य् अध्वश्रमपरिगतं सानुमान् आम्रकूटः ।न क्षुद्रो ऽपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर् यस् तथोच्चैः ॥ १७ ॥

1.18

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैस् त्वय्य् आरूढे शिखरम् अचलः स्निग्धवेणीसवर्णे ।नूनं यास्यत्य् अमरमिथुनप्रेक्षणीयाम् अवस्थां मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १८ ॥

1.19

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्तं तोयोत्सर्गद्रुततरगतिस् तत्परं वर्त्म तीर्णः ।रेवां द्रक्ष्यस्य् उपलविषमे विन्ध्यपादे विशीर्णां भक्तिच्छेदैर् इव विरचितां भूतिम् अङ्गे गजस्य ॥ १९ ॥

1.20

तस्यास् तिक्तैर् वनगजमदैर् वासितं वान्तवृष्टिर् जम्बूकुञ्जप्रतिहतरयं तोयम् आदाय गच्छेः ।अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २० ॥

1.21

नीपं दृष्ट्वा हरितकपिशं केसरैर् अर्धरूढैर् आविर्भूतप्रथममुकुलाः कन्दलीश् चानुकच्छम् ।जग्ध्वारण्येष्व् अधिकसुरभिं गन्धम् आघ्राय चोर्व्याः सारङ्गास् ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २१ ॥

1.22

अम्भोबिन्दुग्रहणचतुरांश् चातकान् वीक्षमाणाः श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।त्वाम् आसाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः सोत्कम्पानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥ २२ ॥

1.23

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथम् अपि भवान् गन्तुम् आशु व्यवस्येत् ॥ २३ ॥

1.24

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नैर् नीडारम्भैर् गृहबलिभुजाम् आकुलग्रामचैत्याः ।त्वय्य् आसन्ने परिणतफलश्यामजम्बूवनान्ताः संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २४ ॥

1.25

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं गत्वा सद्यः फलम् अविकलं कामुकत्वस्य लब्धा ।तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात् सभ्रूभङ्गं मुखम् इव पयो वेत्रवत्याश् चलोर्मि ॥ २५ ॥

1.26

नीचैराख्यं गिरिम् अधिवसेस् तत्र विश्रामहेतोस् त्वत्सम्पर्कात् पुलकितम् इव प्रौढपुष्पैः कदम्बैः ।यः पुण्यस्त्रीरतिपरिमलोद्गारिभिर् नागराणाम् उद्दामानि प्रथयति शिलावेश्मभिर् यौवनानि ॥ २६ ॥

1.27

विश्रान्तः सन् व्रज वननदीतीरजानां निषिञ्चन्न् उद्यानानां नवजलकणैर् यूथिकाजाल्कानि । गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २७ ॥

1.28

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां सौधोत्सङ्गप्रणयविमुखो मा स्म भूर् उज्जयिन्याः ।विद्युद्दामस्फुरितचक्रितैस् तत्र पौराङ्गनानां लोलापाङ्गैर् यदि न रमसे लोचनैर् वञ्चितो ऽसि ॥ २८ ॥

1.29

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभः ।निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य स्त्रीणाम् आद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २९ ॥

1.30

वेणीभूतप्रतनुसलिला ताम् अतीतस्य सिन्धुः पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ ३० ॥

1.31

प्राप्यावन्तीन् उदयनकथाकोविदग्रामवृद्धान् पूर्वोद्दिष्टाम् उपसर पुरीं श्रीविशालां विशालाम् ।स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां शेषैः पुण्यैर् हृतम् इव दिवः कान्तिमत् खण्डम् एकम् ॥ ३१ ॥

1.32

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।यत्र स्त्रीणां हरति सुरतग्लानिम् अङ्गानुकूलः शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३२ ॥

1.33

हारांस् तारांस् तरलगुटिकान् कोटिशः शङ्खशुक्तीः शष्पश्यामान् मरकतमणीन् उन्मयूखप्ररोहान् ।दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान् संलक्ष्यन्ते सलिलनिधयस् तोयमात्रावशेषाः ॥ ३३ ॥

1.34

प्रद्योतस्य प्रियदुहितरं वत्सराजो ऽत्र जह्रे हैमं तालद्रुमवनम् अभूद् अत्र तस्यैव राज्ञः ।अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भम् उत्पाट्य दर्पाद् इत्य् आगन्तून् रमयति जनो यत्र बन्धून् अभिज्ञः ॥ ३४ ॥

1.35

जालोद्गीर्णैर् उपचितवपुः केशसंस्कारधूपैर् बन्धुप्रीत्या भवनशिखिभिर् दत्तनृत्योपहारः ।हर्म्येष्व् अस्याः कुसुमसुरभिष्व् अधवखेदं नयेथा लक्ष्मीं पश्यंल् ललितवनितापादरागाङ्कितेषु ॥ ३५ ॥

1.36

भर्तुः कण्ठच्छविर् इति गणैः सादरं वीक्ष्यमाणः पुण्यं यायास् त्रिभुवनगुरोर् धाम चण्डीश्वरस्य ।धूतोद्यानं कुवलयरजोगन्धिभिर् गन्धवत्यास् तोयक्रीडानिरतयुवतिस्नानतिक्तैर् मरुद्भिः ॥ ३६ ॥

1.37

अप्य् अन्यस्मिञ् जलधर महाकालम् आसाद्य काले स्थातव्यं ते नयनविषयं यावद् अत्येति भानुः ।कुर्वन् सन्ध्यावलिपटहतां शूलिनः श्लाघनीयाम् आमन्द्राणां फलम् अविकलं लप्स्यसे गर्जितानाम् ॥ ३७ ॥

1.38

पादन्यासैः क्वणितरशनास् तत्र लीलावधूतै रत्नच्छायाखचितवलिभिश् चामरैः क्लान्तहस्ताः ।वेश्यास् त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दून् आमोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटक्षान् ॥ ३८ ॥

1.39

पश्चाद् उच्चैर्भुजतरुवनं मण्डलेनाभ्लीनः सांध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।नृत्तारम्भे हर पशुपतेर् आर्द्रनागाजिनेच्छां शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर् भवान्या ॥ ३९ ॥

1.40

गच्छन्तीनां रमाणवसतिं योषितां तत्र नक्तं रुद्धालोके नरपतिपथे सूचिभेद्यैस् तमोभिः ।सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं तोयोत्सर्गस्तनितमुहरो मा च भूर्विक्लवास्ताः ॥ ४० ॥

1.41

तां कस्यांचिद् भवनवलभौ सुप्तपारावतायां नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः ।दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं मन्दायन्ते न खलु सुहृदामभ्युपतार्थकृत्याः ॥ ४१ ॥

1.42

तस्मिन् काले नयनसलिअं योषितां खण्डितानां शान्तिं नेयं प्रणयिभिर् अतो वर्त्म भानोस् त्यजाशु ।प्रालेयास्त्रं कमलवदनात् सोऽपि हर्तुं नलिन्याःप्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पभ्यसूयः ॥ ४२ ॥

1.43

गम्भीरायाः पयसि सरितश् चेतसीव प्रसन्ने छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।तस्माद् अस्याः कुमुदविशदान्य् अर्हसि त्वं न धैर्यान् मोघीकर्तुं चटुलशफोरोद्वर्तनप्रेक्षितानि ॥ ४३ ॥

1.44

तस्याः किंचित् करधृतम् इव प्राप्त्वाईरशाखं हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।प्रस्थानं ते कथम् अपि सखे लम्बमानस्य भावि ज्ञातास्वादो विवृतजघनां को विहातुं समर्था ॥ ४४ ॥

1.45

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।नीचैर् वास्यत्य् उपजिगमिषोर् देवपूर्वं गिरिं ते शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४५ ॥

1.46

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।रक्षाहेतोर् नवशशिभृता वासवीनां चमूनाम् अत्यादित्यं हुतवहमुखे संभृतं तद् धि तेयः ॥ ४६ ॥

1.47

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।धौतापाङ्गं हरशशिरुचा पावकेस् तं मयूरं पश्चाद् अद्रिग्रहणगुरुभिर् गर्जितैर् नर्तयेथाः ॥ ४७ ॥

1.48

आराध्यैनं शरवणभवं देवम् उल्लङ्घिताध्वा सिद्धद्वन्द्वैर् जलकणभयाद् वीणिभिर् मुक्तमार्गः ।व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन् स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥ ४८ ॥

1.49

त्वय्य् आदातुं जलम् अवनते शार्ङ्गिणो वर्णचौरे तस्याः सिन्धोः पृथुम् अपि तनुं दूरभावात् प्रवाहम् ।प्रेक्षिष्यन्ते गगनगतयो नूनम् आवर्ज्य दृष्टिर् एकं भुक्तागुणम् इव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४९ ॥

1.50

ताम् उत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपाद् उपरिविलसत्कृष्णशारप्रभाणाम् ।कुन्दक्षेपानुगमधुकरश्रीमुषाम् आत्मबिम्बं पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ५० ॥

1.51

ब्रह्मावर्तं जनपदम् अथ च्छायया गाहमानः क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद् भजेथाः ।राजन्यानां शितशरशतैर् यत्र गाण्डीवधन्वा धारापातैस् त्वम् इव कमलान्य् अभ्यवर्षन् मुखानि ॥ ५१ ॥

1.52

हित्वा हालाम् अभिमतरसां रेवतीलोचनाङ्कां बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।कृत्वा तासाम् अधिगमम् अपां सौम्य सारस्वतीनाम् अन्तः शुद्धस् त्वम् अपि भविता वर्णमात्रेण कृष्णः ॥ ५२ ॥

1.53

तस्माद् गच्छेर् अनुकनखलं शैलराजावतीर्णां जाह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः शम्भोः केशग्रहणम् अकरोद् इन्दुलग्नोर्मिहस्ता ॥ ५३ ॥

1.54

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी त्वं चेद् अच्छस्फटिकविशदं तर्कयेस् तिर्यग् अम्भः ।संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ स्याद् अस्थानोपगतयमुनासंगमेवाभिरामा ॥ ५४ ॥

1.55

आसीनानां सुरभितशिलं नाभिगन्धैर् मृगाणां तस्या एव प्रभवम् अचलं प्राप्य गौरं तुषारैः ।वक्ष्यस्य् अध्वश्रमविनयेन तस्य शृङ्गे निषण्णः शोभां शुभ्रां त्रिनयनवृषोत्खातपङ्कोपमेयम् ॥ ५५ ॥

1.56

तं चेद् वायौ सरति सरलस्कन्धसंघट्टजन्मा बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।अर्हस्य् एनं शमयितुम् अलं वारिधारासहस्रैर् आपन्नार्तिप्रशमनफलाः संपदो ह्य् उत्तमानाम् ॥ ५६ ॥

1.57

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन् मुक्ताध्वानं सपदि शरभा लङ्घयेयुर् भवन्तम् ।तान् कुर्वीथास् तुमुलकरकावृष्टिपातावकीर्णन् के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ ५७ ॥

1.58

तत्र व्यक्तं दृषदि चरणन्यासम् अर्धेन्दुमौलेः शश्वत् सिद्धैर् उपचितबलिं भक्तिनम्रः परीयाः ।यस्मिन् दृष्टे करणविगमाद् ऊर्ध्वम् उद्धूतपापाः कल्पिष्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५८ ॥

1.59

शब्दायन्ते मधुरम् अनिलैः कीचकाः पूर्यमाणाः संरक्ताभिस् त्रिपुरविजयो गीयते किंनराभिः ।निर्ह्रादस् ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात् संगीतार्थो ननु पशुपतेस् तत्र भावी समग्रः ॥ ५९ ॥

1.60

प्रालेयाद्रेर् उपतटम् अतिक्रम्य तांस् तान् विशेषान् हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।तेनोदीचीं दिशम् अनुसरेस् तिर्यग् आयामशोभी श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥ ६० ॥

1.61

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।शृङ्गोच्छ्रायैः कुमुदविशदैर् यो वितत्य स्थितः खं राशीभूतः प्रतिदिनम् इव त्र्यम्बकस्यट्टहासः ॥ ६१ ॥

1.62

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य ।शोभाम् अद्रेः स्तिमितनयनप्रेक्षणीयां भवित्रीम् अंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६२ ॥

1.63

हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ।भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ ६३ ॥

1.64

तत्रावश्यं वलयकुलिशोद्धट्टनोद्गीर्णतोयं नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।ताभ्यो मोक्षस् तव यदि सखे घर्मलब्धस्य न स्यात् क्रीडालोलाः श्रवणपरुषैर् गर्जितैर् भाययेस् ताः ॥ ६४ ॥

1.65

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः कुर्वन् कामं क्षणमुखपटप्रीतिम् ऐरावतस्य ।धुन्वन् कल्पद्रुमकिसलयान् यंशुकानीव वातैर् नानाचेष्टैर् जलदललितैर् निर्विशेस् तं नगेन्द्रम् ॥ ६५ ॥

1.66

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां न त्वं दृष्ट्वा न पुनर् अलकां ज्ञास्यसे कामचारिन् ।या वः काले वहति सलिलोद्गारम् उच्चैर् विमाना मुक्ताजालग्रथितम् अलकं कामिनीवाभ्रवृन्दम् ॥ ६६ ॥

2.head

उत्तरमेघः

2.1

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।अन्तस्तोयं मणिमयभुवस् तुङ्गम् अभ्रंलिहाग्राः प्रासादास् त्वां तुलयितुम् अलं यत्र तैस् तैर् विशेषैः ॥ १ ॥

2.2

हस्ते लीलाकमलम् अलके बालकुन्दानुविद्धं नीता लोध्रप्रसवरजसा पाण्डुताम् आनने श्रीः ।चूडापाशे नवकुरवकं चारु कर्णे शिरीषं सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ २ ॥

2.3

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।केकोत्कण्ठा भुवनशिखिनो नित्यभास्वत्कलापा नित्यज्योत्स्नाः प्रहिततमोवृत्तिरम्याः प्रदोषाः ॥ ३ ॥

2.4

आनन्दोत्थं नयनसलिलम्यत्र नान्यैर् निमित्तैर् नान्यस् तापं कुसुमशरजाद् इष्टसंयोगसाध्यात् ।नाप्य् अन्यस्मात् प्रणयकलहाद् विप्रयोगोपपत्तिर् वित्तेशानां न च खलु वयो यौवनाद् अन्यद् अस्ति ॥ ४ ॥

2.5

यस्यां यक्षाः सितमणिमयान्य् एत्य हर्म्यस्थलानि ज्योतिश्छायाकुसुमरचितान्य् उत्तमस्त्रीसहायाः ।आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्व् आहतेषु ॥ ५ ॥

2.6

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भिर् मन्दाराणाम् अनुतटरुहां छायया वारितोष्णाः ।अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः संक्रीडन्ते मणिभिरमरप्रार्थितया यत्र कन्याः ॥ ६ ॥

2.7

नीवीबन्धोच्छ्वासितशिथिलं यत्र बिम्बाधराणां क्षौमं रागादनिभृतकरेष्व् आक्षिपत्सु प्रियेषु ।अर्चिस्तुङ्गान् अभिमुखम् अपि प्राप्य रत्नप्रदीपान् ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ७ ॥

2.8

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमीर् आलेख्यानां सलिलकणिकादोषम् उत्पाद्य सद्यः ।शङ्कास्पृष्टा इव जलमुचस् त्वादृशा जालमार्गैर् धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ८ ॥

2.9

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गितानाम् अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।त्वत्संरोधापगमविशदश् चन्द्रपादैर् निशीथे व्यालुम्पन्ति स्फुटजललवस्यन्दिनश् चन्द्रकान्ताः ॥ ९ ॥

2.10

अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठैर् उद्गायद्भिर् धनपतियशः किंनरैर् यत्र सार्धम् ।वैभ्राजाख्यं विबुधवनितावारमुख्यसहाया बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥ १० ॥

2.11

गत्युत्कम्पाद् अलकपतितैर् यत्र मन्दारपुष्पैः पुत्रच्छेदैः कनककमलैः कर्णविस्रंशिभिश् च ।मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश् च हारैर् नैशो मार्गः सवितुर् उदये सूच्यते कामिनीनाम् ॥ ११ ॥

2.12

वासश् चित्रं मधु नयनयोर् विभ्रमादेशदक्षं पुष्पोद्भेदं सह किसलयैर् भूषणानां विकल्पम् ।लाक्षारागं चरणकमलन्यासयोग्यं च यस्याम् एकः सूते सकलम् अबलामण्डनं कल्पवृक्षः ॥ १२ ॥

2.13

पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः शैलोदग्रास् त्वम् इव करिणो वृष्टिमन्तः प्रभेदात् ।योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः प्रत्यादिष्टाभरणरुचयश् चन्द्रहासव्रणाङ्कैः ॥ १३ ॥

2.14

मत्वा देवं धनपतिसखं यत्र साक्षाद् वसन्तं प्रायश् चापं न वहति भयान् मन्मथः षट्पदज्यम् ।सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्व् अमोघैस् तस्यारम्भश् चतुरवनिताविभ्रमैर् एव सिद्धः ॥ १४ ॥

2.15

तत्रागारं धनपतिगृहान् उत्तरेणास्मदीयं दूराल् लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ १५ ॥

2.16

वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।यस्यास् तोये कृतवसतयो मानसं संनिकृष्टं नाध्यास्यन्ति व्यपगतशुचस् त्वाम् अपि प्रेक्ष्य हंसाः ॥ १६ ॥

2.17

तस्यास् तीरे रचितशिखरः पेशलैर् इन्द्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण प्रेक्ष्योपान्तस्फुरिततडितं त्वां तम् एव स्मरामि ॥ १७ ॥

2.18

रक्ताशोकश् चलकिसलयः केसरश् चात्र कान्तः प्रत्यासन्नौ कुरुवकवृतेर् माधवीमण्डपस्य ।एकः सख्यास् तव सह मया वामपादाभिलाषी काङ्क्षत्य् अन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥ १८ ॥

2.19

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिर् मूले बद्धा मणिभिर् अनतिप्रौढवंशप्रकाशैः ।तालैः शिञ्जावलयसुभगैर् नर्तितः कान्तया मे याम् अध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ॥ १९ ॥

2.20

एभिः साधो हृदयनिहितैर् लक्षणैर् लक्षयेथा द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।क्षामच्छायां भवनम् अधुना मद्वियोगेन नूनं सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ॥ २० ॥

2.21

गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।अर्हस्य् अन्तर्भवनपतितां कर्तुम् अल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ २१ ॥

2.22

तन्वी श्यामा शिखरीदशना पक्वबिम्बाधरौष्ठी मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।श्रोणीभाराद् अलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद् युवतीविषये सृष्टिर् आद्यैव धातुः ॥ २२ ॥

2.23

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सहचरे चक्रवाकीम् इवैकाम् ।गाढोत्कण्ठां गुरुषु दिवसेष्व् एषु गच्छत्सु बालां जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥ २३ ॥

2.24

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया निःश्वासानाम् अशिशिरतया भिन्नवर्णाधरोष्ठम् ।हस्तन्यस्तं मुखम् असकलव्यक्ति लम्बालकत्वाद् इन्दोर् दैन्यं त्वदनुसरणक्लिष्टकान्तेर् बिभर्ति ॥ २४ ॥

2.25

आलोके ते निपतति पुरा सा बलिव्याकुला वा मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां कच्चिद् भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ २५ ॥

2.26

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां मद्गोत्राङ्कं विरचितपदं गेयम् उद्गातुकामा ।तन्त्रीम् आर्द्रां नयनसलिलैः सारयित्वा कथंचिद् भूयो भूयः स्वयम् अपि कृतां मूर्च्छनां विस्मरन्ती ॥ २६ ॥

2.27

शेषान् मासान् विरहदिवासस्थापितस्यावधेर् वा विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।सम्भोगं वा हृदयनिहितारम्भम् आस्वादयन्ती प्रायेणैते रमणविरहेष्व् अङ्गनानां विनोदाः ॥ २७ ॥

2.28

सव्यापारम् अहनि न तथा पीडयेद् विप्रयोगः शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।मत्सन्देशः सुखयितुम् अलं पश्य साध्वीं निशीथे ताम् उन्निद्राम् अवनिशयनां सौधवातायनस्थः ॥ २८ ॥

2.29

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां प्राचीमूले तनुम् इव कलामात्रशेषां हिमांशोः ।नीता रात्रिः क्षण इव मया सार्धम् इच्छारतैर् या ताम् एवोष्णैर् विरहमहतीम् अश्रुभिर् यापयन्तीम् ॥ २९ ॥

2.30

पादान् इन्दोरमृतशिशिराञ्जलमार्गप्रविष्टान् पूर्वप्रीत्या गतमभुमुखं संनिवृत्तं तथैव ।चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं साभ्रेऽह्नीव स्थलकमलिनी न प्रभुद्धां न सुप्ताम् ॥ ३० ॥

2.31

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं शुद्धस्नानात् परुषमलकं नूनमागण्ण्दलम्बम् ।मत्संभोगः कथमुपनमेत् स्वप्नजोऽअपीति निद्राम् आकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशम् ॥ ३१ ॥

2.32

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।स्पर्शक्लिष्टाम् अयमितनखेनासकृत्सारयन्तीं गण्डाभोगात् कठिनविषमाम् एकवेणीं करेण ॥ ३२ ॥

2.33

सा संन्यस्ताभरणम् अबला पेशलं धारयन्ती शय्योत्सङ्गे निहितम् असकृद् दुःखदुःखेन गात्रम् ।त्वाम् अप्य् अस्रं नवजलमयं मोचयिष्यत्य् अवश्यं प्रायः सर्वो भवति करुणावृत्तिर् आर्द्रान्तरात्मा ॥ ३३ ॥

2.34

जाने सख्यास् तव मयि मनः संभृतस्नेहमस्माद् इत्थंभूतां प्रथमविरहे ताम् अहं तर्कयामि ।वाचालं मां न खलु सुभगंमन्यभावः करोति प्रत्यक्षं ते निखिलम् अचिराद् भ्रातर् उक्तं मया यत् ॥ ३४ ॥

2.35

रुद्धापाङ्गप्रसरम् अलकैर् अञ्जनस्नेहशून्यं प्रत्यादेशाद् अपि च मधुनो विस्मृतभ्रूविलासम् ।त्वय्य् आसन्ने नयनम् उपरिस्पन्दि शङ्के मृगाक्ष्या मीनक्षोभाच् चलकुवलयश्रीतुलाम् एष्यतीति ॥ ३५ ॥

2.36

वामश् चास्याः कररुहपदैर् मुच्यमानो मदीयैर् मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।संभोगान्ते मम समुचितो हस्तसंवाहमानां यास्यत्य् ऊरुः सरसकदलीस्तम्भगौरश् चलत्वम् ॥ ३६ ॥

2.37

तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्याद् अन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।मा भूद् अस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचित् सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ३७ ॥

2.38

ताम् उत्थाप्य स्वजलकणिकाशीतलेनानिलेन प्रत्याश्वस्तां समम् अभिनवैर् जालकैर् मालतीनाम् ।विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे वक्तुं धीरः स्तनितवचनैर् मानिनीं प्रक्रमेथाः ॥ ३८ ॥

2.39

भर्तुर् मित्रं प्रियम् अविधवे विद्धि माम् अम्बुवाहं तत्संदेशैर् हृदयनिहितैर् आगतं त्वत्समीपम् ।यो वृन्दानि त्वरयति पथि श्रम्यतां प्रोषितानां मन्द्रस्निग्धैर् ध्वनिभिर् अबलावेणिमोक्षोत्सुकानि ॥ ३९ ॥

2.40

इत्य् आख्याते पवनतनयं मैथिलीवोन्मुखी सा त्वाम् उत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव ।श्रोष्यत्य् अस्मात् परम् अवहिता सौम्य सीमन्तिनीनां कान्तोदन्तः सुहृदुपनतः संगमात् किंचिद् ऊनः ॥ ४० ॥

2.41

ताम् आयुष्मन् मम च वचनाद् आत्मनश् चोपकर्तुं ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः ।अव्यापन्नः कुशलम् अबले पृच्छति त्वां वियुक्तः पूर्वाभाष्यं सुलभविपदां प्राणिनाम् एतद् एव ॥ ४१ ॥

2.42

अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं सास्रेणाश्रुद्रुतम् अविरतोत्कण्ठम् उत्कण्ठितेन ।उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती संकल्पैस् तैर् विशति विधिना वैरिणा रुद्धमार्गः ॥ ४२ ॥

2.43

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात् कर्णे लोलः कथयितुम् अभूद् आननस्पर्शलोभात् ।सो ऽतिक्रान्तः श्रवणविषयं लोचनाभ्याम् अदृष्टस् त्वाम् उत्कण्ठाविरचितपदं मन्मुखेनेदम् आह ॥ ४३ ॥

2.44

श्यामास्व् अङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं वक्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान् हन्तैकस्मिन् क्वचिद् अपि न ते चण्डि सादृश्यम् अस्ति ॥ ४४ ॥

2.45

त्वाम् आलिख्य प्रणयकुपितां धातुरागैः शिलायाम् आत्मानं ते चरणपतितं यावद् इच्छामि कर्तुम् ।अस्रैस् तावन् मुहुर् उपचितैर् दृष्टिर् आलुप्यते मे क्रूरस् तस्मिन्न् अपि न सहते संगमं नौ कृतान्तः ॥ ४५ ॥

2.46

माम् आकाशप्रणिहितभुजं निर्दयाश्लेषहेतोर् लब्धायास् ते कथम् अपि मया स्वप्नसन्दर्शनेषु ।पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां मुक्तास्थूलास् तरुकिसलयेष्व् अश्रुलेशाः पतन्ति ॥ ४६ ॥

2.47

भित्त्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः पूर्वं स्पृष्टं यदि किल भवेद् अङ्गम् एभिस् तवेति ॥ ४७ ॥

2.48

संक्षिप्यन्ते क्षन इव कथं दीर्घयामा त्रियामा सर्वावस्थास्व् अहर् अपि कथं मन्दमन्दातपं स्यात् ।इत्थं चेतश् चटुलनयने दुर्लभप्रार्थनं मे गाढोष्माभिः कृतम् अशरणं त्वद्वियोगव्यथाभिः ॥ ४८ ॥

2.49

नन्व् आत्मानं बहु विगणयन्न् आत्मनैवावलम्बे तत्कल्याणि त्वम् अपि नितरां मा गमः कातरत्वम् ।कस्यात्यन्तं सुखम् उपनतं दुःखम् एकान्ततो वा नीचैर् गच्छत्य् उपरि च दशा चक्रनेमिक्रमेण ॥ ४९ ॥

2.50

शापान्तो मे भुजगशयनाद् उत्थिते शार्ङ्गपाणौ शेषान् मासान् गमय चतुरो लोचने मीलयित्वा ।पश्चाद् आवां विरहगुणितं तं तम् आत्माभिलाषं निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ५० ॥

2.51

भूयश्चाह त्वम् अपि शयने कण्ठलग्ना पुरा मे निद्रां गत्वा किम् अपि रुदती सस्वरं विप्रबुद्धा ।सान्तर्हासं कथितम् असकृत् पृच्छतश् च त्वया मे दृष्टः स्वप्ने कितव रमयन् काम् अपि त्वं मयेति ॥ ५१ ॥

2.52

एतस्मान् मां कुशलिनम् अभिज्ञानदानाद् विदित्वा मा कौलीनाद् असितनयने मय्य् अविश्वासिनी भूः ।स्नेहान् आहुः किम् अपि विरहे ध्वंसिनस् ते त्व् अभोगाद् इष्टे वस्तुन्य् उपचितरसाः प्रेमराशीभवन्ति ॥ ५२ ॥

2.53

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते शैलाद् आशु त्रिनयनवृषोत्खातकूटान् निवृत्तः ।साभिज्ञानप्रहितकुशलैस् तद्वचोभिर् ममापि प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ५३ ॥

2.54

कच्चित् सौम्य व्यवसितम् इदं बन्धुकृत्यं त्वया मे प्रत्यादेशान् न खलु भवतो धीरतां कल्पयामि ।निःशब्दो ऽपि प्रदिशसि जलं याचितश् चातकेभ्यः प्रत्युक्तं हि प्रणयिषु सताम् ईप्सितार्थक्रियैव ॥ ५४ ॥

2.55

एतत् कृत्वा प्रियम् अनुचितप्रार्थनावर्तिनो मेसौहार्दाद् वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।इष्टान् देशाञ् जलद विचर प्रावृषा संभृतश्रीर्मा भूद् एवं क्षणम् अपि च ते विद्युता विप्रयोगः ॥ ५५ ॥